*Siddhanta's International Journal of Advanced Research in Arts & Humanities*
*Vol. 3, No. 2, November – December 2025*

# आधुनिकपरम्परायां जैनसिद्धान्तकौमुद्याः वैशिष्ट्यम्

**धीरज दाश**
शोधछात्रा, संस्कृतविभाग, महाराजा पूर्णचन्द्र भञ्जदेओ विश्वविद्यालय, ओडिशा

**"वर्षाणां भारतः श्रेष्ठः देशानामुत्कलः स्मृतः ।**

**उत्कलस्य समो देशो देशो नास्ति महीतले" ॥**

**सारांश**

व्याकरणशास्त्रस्य ये मार्गाः प्रदर्शिताः सन्ति ते तु प्रतिस्थलं स्वीयं वैशिष्ट्यं समादाय परिपुष्टाः सन्ति । जैनसिद्धान्तकौमुद्यां पाणिनीयव्याकरणस्य यानि सूत्राणि विरचितानि सन्ति तानि अनुसृत्य सकलाः पद्धतयः अनुसृताः सन्ति । संज्ञाप्रकरणादारभ्य तद्धितप्रकरणं यावत् ग्रन्थेऽस्मिन् सर्वं विभिन्नैः सूत्रैः समलंकृतम् सन्ति । एतेषां विभागानां यदि वयं परिशीलनं कुर्मः तदा व्याकरणशास्त्रस्य सर्वाङ्गपूर्णं स्वरूपं प्रदर्शितं दृश्यते । अतः अनेन ग्रन्थमाध्यमेन जैनाचार्याणां गम्भीरव्याकरणपरम्परायां यः प्रवेशः वर्त्तते इति वयं स्पष्टीकर्त्तुं शक्नुमः । प्रसङ्गानुसारं वयमित्यपि वक्तुं शक्नुमः यत् यदा ग्रन्थस्य रचना भवति तदनन्तरं ये ग्रन्थाः विरचिताः भविष्यन्ति ते सर्वे आधुनिकाः इति कथयामः । अर्थात् जैनव्याकरणस्य रचनात्परं ये व्याकरणग्रन्थाः अस्माभिः परिदृष्टाः भवन्ति ते सर्वे आधुनिकाः सन्त्येव । अस्याः जैनसिद्धान्तकौमुद्याः अध्ययनात्परं छात्राः व्याकरणसूत्राणां लघुत्वमर्थगौरवं तर्कयुक्ततामतीतसन्दिग्धपक्षमनुभवन्ति । आधुनिककाले अयं ग्रन्थः स्वस्य सारगर्भसूत्राणामित्थं प्रतिपादनं कृतमस्ति येनोत्तरवैयाकरणाः तां पद्धतिमनुसृत्य नूतनान् ग्रन्थान् निर्मातुं प्रेरिताः भविष्यन्ति । भाषावैज्ञानिकदृष्ट्यापि अयं ग्रन्थः सर्वातिशायीति अनुभूयते । उदाहरणत्वेन ग्रन्थस्यास्य संज्ञाप्रकरणे अ आ इ ई उ ऊ ए ओ स्वराः[1] इति सूत्रं दृष्ट्वैव प्रसीदति जनः एते स्वरवर्णाः इति साक्षादेव ज्ञातुं शक्नुवन्ति । परन्तु पाणिनीयपरम्परायां गुरुपरम्परामनुसृत्य येऽध्ययनं कुर्वन्ति ते केवलं तस्य ग्रन्थस्याभिज्ञानं कण्ठस्थं च कर्तुं शक्नुवन्ति । सूत्राणां कण्ठस्थं विना नैव कश्चित् वर्णपरम्पराज्ञानं समधिगच्छति । अतः अस्याः जैनसिद्धान्तकौमुद्याः अध्ययनेनाकस्मादेव विना गुरुं सूत्राणामर्थमवगन्तुं शक्नुवन्ति । अतः आधुनिकपरम्परायाम् एतस्य वैशिष्ट्यं प्रतिसत्रमनुभूयते ।

**कूटशब्दाः-** जैनव्याकरणम्, पाणिनीयसुत्रम्, अर्थवोधः, प्रातिपादिकम्, कारकम्

## सूत्राणां संक्षिप्तता क्रमबद्धता च

पाणिनीयव्याकरणे कस्य लोपसंज्ञा भवतीति प्रश्नः जायमाने अदर्शनं लोपः इति सूत्रमस्माकं पुरतः प्रतिभाति परन्तु सूत्रमिदं यदा व्याख्यां कुर्मः तदास्माकं सविधे इयमेव शङ्का समुत्पन्ना भवति यत् कस्यादर्शनमिति । परन्तु जैनसिद्धान्तकौमुद्यां साक्षादेव विलिखितमस्ति प्रसक्तस्यादर्शनं लोपः[2] इति । अतः एतेन ज्ञायते पाणिनीयं व्याकरणं वृत्तिं विनासम्पूर्णं भवति । परन्तु जैनसिद्धान्तकौमुदी विना वृत्तिमपि स्वकीयवैशिष्ट्येन अर्थं बोधयतीति । समेषामपि वैयाकरणानां परमं तथा चरमं लक्ष्यं भवति शब्दसाधुत्वप्रकारकज्ञानम् । तेनैव साधुशब्दज्ञानेन कथं मोक्षप्राप्तिर्भविष्यति तदर्थं तेऽहर्निशं प्रयतन्ते तथा जनसमुदायस्य कृते ग्रन्थानां निर्माणं कुर्वन्ति । व्याकरणशास्त्रस्य ये सिद्धान्ताः सन्ति तथा च ये पक्षाः सन्ति ते प्रायशः समानाः इति ज्ञायन्ते । भट्टोजीदीक्षितादयः पाणिनीयव्याकरणमनुसृत्य ये ग्रन्थाः तैः लिखिताः सन्ति प्रकरणानुसारं तेषां महत्त्वमपि परिदृष्टाः विद्यन्ते । तथैव अस्यां जैनसिद्धान्तकौमुद्यामपि तानि प्रकरणानि विलिखितानि सन्ति । एतस्मात् ज्ञायते अस्याः वैशिष्ट्यमपि पूर्वपद्धतिमनुसृत्यापि विलिखिताः सन्ति परन्तु स्वीयवैशिष्ट्येन व्याकरणजिज्ञासूनां कृते एकं नूतनमार्गं प्रदर्शयति । जैनसिद्धान्तकौमुदीग्रन्थः

व्याकरणशिक्षणार्थमत्यन्तमुपयुक्तमस्ति । अस्य ग्रन्थस्य विशेषता वर्त्तते यत् सूत्राणि लघूनि सन्ति तथा स्पष्टप्रतिपादकानि क्रमबद्धाश्च । प्रत्येकस्मिन् प्रकरणे सर्वाण्यपि सूत्राणि सुव्यवस्थानि परिदृश्यमानानि भवन्ति । अतः व्याकरणजिज्ञासवः स्वल्पेन कालेन व्याकरणस्य रहस्यं ज्ञातुं शक्नुवन्ति । अस्यां जैनसिद्धान्तकौमुद्यामनेन प्रकारेणोदाहरणानि परिभाषाश्च प्रदत्ताः सन्ति येन शास्त्राणां त्वरितं बोधः जायते । अपि च सूत्राणां संक्षिप्तता क्रमबद्धता च स्मरणं सुकरं कारयति । जैनसिद्धान्तकौमुद्यां व्याख्या भाषारूपेण नावश्यकी । यतो हि जैनसिद्धान्तकौमुद्याः सूत्राणि सार्थप्रकाशकान्येव सन्ति पाणिनीयव्याकरणवत् क्लिष्टतात्र न दृश्यते अतः छात्राः शीघ्रं विषयं ग्रहीतुं शक्नुवन्ति । इयं कौमुदी सूत्ररूपेण व्यवस्थिता वर्त्तते इति कारणेन शिक्षणं युक्तियुक्तं वेदवत् भवति । संस्कृतभाषायाः शिक्षायामियं कौमुदी काचित् नूतना परम्परा आविष्कृता दृश्यमाना भवति । स्वल्पेन कालेनाधिकज्ञानं प्राप्यते इति एतस्य ग्रन्थस्य विशेषलाभो विद्यते । अतः झटित्यध्ययनाय स्थालीबोधाय स्मरणसुलभायेयं कौमुदी हेतुभूता भवति । बौद्धिकविकासक्षेत्रेऽपि इयं कौमुदी नूतनां दिशमाविष्करोति । एतादृशं ग्रन्थं पठित्वा संस्कृतभाषायाः सूक्ष्मं रूपं ज्ञातुं तथा तर्कशास्त्रीयतथ्यं च स्पष्टकर्तुं शक्नुवन्ति । केवलं शब्दविज्ञानरूपेण न अपि तु इयं कौमुदी मोक्षमार्गस्य साधनरूपेण परिदृश्यमाना भवति । अतः शब्दशास्त्रं तथा दार्शनिकशास्त्ररूपेण इयं कौमुदी आधुनिककाले प्रचलिता दृश्यते । भाषाशुद्ध्या सह नैतिकशिक्षापि एतेन ग्रन्थेन विचारितं दृश्यते । संस्कृतव्याकरणक्षेत्रे इयं कौमुदी अमूल्यरत्नस्वरूपा दृश्यते । अयं ग्रन्थः भाषाशास्त्रं दर्शनशास्त्रेण संयोजयति । भाषात्र केवलं सम्प्रेषणस्य साधनं नापि तु आत्मशुद्धेः विकारशुद्धेश्च माध्यममिति प्रतिपाद्यते । एषा कौमुदी जैनदर्शनं तथा भाषाशास्त्रयोः आधुनिकक्षेत्ररूपा भवति ।

## जैनसिद्धान्तदिशा पदार्थयोः लाघवम्

व्याकरणस्य अल्पाक्षरेण लाघवनियमानुसारं वैयाकरणैः अनुवर्तनपरम्परा संस्थापिता कृता । वस्तुत इयम् अनुवर्तनपरम्परा तेषां कृते सौकर्यं स्यात् ये सम्पूर्णमपि व्याकरणम् अष्टाध्यायिपरम्परया अधीयीरन् । सम्पूर्णमपि सास्त्राध्ययनानन्तरमेव अनुवर्तनज्ञानं भवितुमर्हति । परन्तु ये अष्टाध्यायिपरम्परया नाधीतवन्तः,ते सूत्रवृत्तिम् अभ्यस्य व्याकरणम् अवगच्छन्ति । एतत् सर्वं संवीक्ष्य परमवैयाकरणेन श्रीरत्नचन्द्रमुनिना एतादृशं व्याकरणं विरचितम् । यत्र नान्तरेण अनुवर्तनेनापि सूत्राणामर्थबोधने श्रेयस्करं भवितुमर्हति । न केवलं सूत्रविषये अपि तु सूत्राणामेवं प्रकारेण क्रमः सुसज्जितः यत्र वार्तिकाणि भाष्याणि च अस्मिन्नन्तर्भवन्ति । यानि पदान्यत्र पर्युपयुक्तानि तानि अत्यन्तं सरलानि निःसन्दिग्धानि च भवन्ति । तत्र प्रतिप्रकरणस्य निष्कर्षः अत्र संस्थाप्यते । एतदवश्यमाधुनिकपरम्परामेधयति नितराम् । कारकप्रकणस्य प्रथमाविभक्तिं निरूपणार्थं पाणिन्यादिव्याकणे सूत्रत्रयस्य आवश्यकताऽस्ति । किन्तु जैनसिद्धान्तकौमुद्यान्तु अभिहिते प्रथमा[3] इत्येकेनैव सूत्रेण विस्पष्टार्थं सर्वं साधयितुं शक्यते । सर्वत्रानुवर्तनं न भवति इति न कुत्रचित् तु अनुवर्तनं भवत्येव । उदाहरणं यथा कर्मणि द्वितीया इत्यस्मिन् सूत्रे कर्म इति पदं पूर्वस्मात् सूत्रादनुवर्तते । पाणिनिव्याकरणे अधिकरणस्य द्वितीयाविभक्तिं विधातुं अधिशीङ्स्थासां कर्म इत्यादीनि त्रीणि सूत्राणि विरचितानि सन्ति । परन्तु जैनसिद्धान्तकौमुद्याम् कर्त्राप्तुमिष्यमाणतमं कर्म अर्थात् कर्ता स्ववृत्तिव्यापारप्रयोज्यफलेन यं सम्बद्धुमिच्छति स कारकः कर्मसंज्ञः स्यात् [4] इत्येकेनैव सूत्रेण त्रयाणामर्थः अन्तर्भवति । केचन चिन्तयन्ति अक्षरं वा पदानां वा न्यूनतया लघुत्वं भवतीति । परन्तु मुख्यतः केवलं पदानां लाघवमिति न भाष्यकारेण अर्थस्यापि लाघवं नैकत्र प्रदर्शितम् । अतः अर्थलाघवदृष्ट्या इदम् जैनव्याकरणं परमः पन्था वर्तते । येन चाधुनिकपरम्परायां लोकोपकारकत्वं जनयति । यत्र पाणिनिव्याकरणस्य पददृष्ट्या अर्थदृष्ट्या वा लघुत्वमस्ति तत्र गन्थकारैः नैव तत्सूत्रं परिवृत्यते । उदाहरणं यथा- आधारोऽधिकरणम्- कर्तृकर्मद्वारा क्रियायाम् आधारोऽधिकरणसंज्ञं स्यात् [5] इति । बहुत्र अनेकाणि सूत्राणि एकसूत्रेणैव अन्तर्निहितानि सन्ति । उदाहरणं यथा-पाणिनिव्याकरणे कालाध्वनोरत्यन्तसंयोगे[6], अपवर्गे तृतीया[7] इति सूत्रद्वयं कालाध्वनोः व्यापकत्वे तदभावे तृतीया द्वितीयाकालावयवाध्वावयववाचिशब्दाभ्यां व्यापकत्वेऽर्थे द्वितीया स्यात् यत्र व्यापकत्वं न स्यात् तत्र तृतीयाविभक्तिः स्यात्[8] इत्येकेनैव सूत्रेण सूत्रद्वयस्य अर्थः प्रतिपादयति । पाणिनिव्याकरणे प्रत्येकपदज्ञानादनन्तरमेव यथार्थः समायाति यथा साधकतमं करणमित्यत्र

साधकतमित्यस्य अर्थः प्रकृष्टोपकारकं ततः सूत्रार्थः समायाति । परन्तु जैनसिद्धान्तकौमुद्यां क्रियायाः प्रकृष्टोपकारकं करणम्-क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्[9] इति साक्षादेवार्थज्ञानं भवति येन च आधुनिकपरम्परायां सुकरं भवतीदं व्याकरणं चिरन्तनम्।

## सूत्रोपन्यासे शाब्दिकानां मतवैविध्यम्

कुत्रचित् पाणिनिव्याकरणस्य एकमेव सूत्रमत्र जैनसिद्धान्तकौमुद्यां सूत्रद्वयेन विज्ञापितम् । यत्र पाणिनिव्याकरणे विकल्पार्थं वा इति अव्ययं प्रयुक्तमत्र तदेव तत्प्रयुक्तं पदं समुपस्थापितम् । उदाहरणं यथा- दिवः करणं कर्म व इति । सह योगेऽभावे च तृतीयाविभक्तिं विधातुं पाणिनीयव्याकरणे तथा सूत्रं नास्ति परन्तु जैनसिद्धान्तकौमुद्यां तु सहयुक्तेऽप्रधाने तदर्थे गम्येऽपि इति सूत्रमिदं विरचितम् । तत्र उपदेशेऽजनुनासिक इत् इत्यत्र किञ्च अन्योन्याश्रयदोषविषये अयं निष्कर्षः आगच्छति । यत्- पाणिन्यादिव्याकरणे अन्योन्याश्रयदोषनिवारयितुं महान् प्रयत्नः अपेक्षितोऽस्ति । किञ्च उपदेशेऽजनुनासिक इत् इत्यस्मात् सूत्रादपि अनुवर्तनम् अपेक्षितं परन्तु अस्मिन् व्याकरणे अप्रयुज्यमानः सफल इत्[10] इति सूत्रदर्शनेन एव बोधो जायते । कस्मादपि अनुवर्तनस्य अन्योन्याश्रयदोषस्य वा अपेक्षा नैव वर्तते । पुनरपि श्रीहरिनामामृतव्याकरणे तु संज्ञेयं नैव विहिता पक्षान्तरे तस्य अवगमनं भवति । मुग्धबोधव्याकरणे अक्षरदृष्ट्या लघुत्वेऽपि अवबोधदृष्ट्या गौरवमेव । सारस्वतव्याकरणे बोद्धुं सारल्यं सत् पङ्क्त्या अवगमने कष्टसाध्यं भवत्येव । प्रत्याहारसंज्ञाविधानवेलायामयं निष्कर्ष आगच्छति । यत् श्रीमता पाणिनिना अष्टाध्यायां प्रत्याहारसंज्ञाविधातुं यत्सूत्रं विरचितं तत् लाघवं सत्वेऽपि तत्र आदौ इत्पदस्य ज्ञानमपेक्षितं किञ्च आद्यन्तेन साकम् आक्षेपेण मध्यगानां वर्णानां बोधः इत्यादिकमाशुबोधव्याकरणापेक्षया गौरवमेव । परन्तु जैनसिद्धान्तकौमुद्यां तु रत्नचन्द्रेण साक्षादेव पङ्क्तिवत् सूचितम् । तत् तु सर्वेषां वैयाकरणावैयाकरणानां कृते सुकरं भवति । हरिनामामृतादिव्याकरणेषु नैकानि सूत्राणि प्रत्याहारसंज्ञां विधातुं निगदितानि सन्ति। तथैव अन्यत्रापि गुरुसूत्रविशिष्टानि सूत्राणि विरचितानि तानि सर्वाणि गौरवाय एव भवति इति । सवर्णसंज्ञानिर्धारणवेलायामुच्यतेऽयं निष्कर्षः । यद् हरिनामामृतव्याकरणे सवर्णसंज्ञां प्रतिपादयितुं नैकानि सूत्राणि प्रतिपादितानि सन्ति । अतः एकसूत्रापेक्षया बहुसूत्राणामर्थावबोधः गौरवाय भवति। पुनरपि सारस्वतव्याकरणे केवलं ह्रस्वादिवर्णानां विषये सवर्णसंज्ञा प्रोक्तास्ति । किञ्च पाणिनिव्याकरणे तुल्यास्यप्रयत्नं सवर्णमित्यत्र आस्यमित्यस्य कः अर्थः , प्रयत्नः इत्यस्य कः अर्थः इत्यादीनां ज्ञानानन्तरमेव सूत्रस्य बोधः भवति । तदर्थं भगवता अनुभूतिस्वरूपाचार्येण कृतं तत् एकस्थानोच्चार्याः मिथः सवर्णाः इति सूत्रं सुकरं सुबोधश्च भवतीति । प्रातिपदिकसंज्ञानिर्धारणवेलायां निष्कर्षोऽयमागच्छति । यत् उभयत्र पाणिनि-आशुबोधव्याकरणयोः समानमेव अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रं विरचितम् । किं वा अनयोः गरिमा वक्तव्यः। परन्तु सारस्वतव्याकरणे इमां संज्ञां विधातुं कृतमिदं सूत्रं नितरां लाघवमेव । किन्तु तत्र तावत् पङ्क्ति द्वारा तदधिकं वक्तव्यमिति । अपि च हरिनामामृतव्याकरणमपि अर्थदृष्ट्या लाघवमिति । सर्वनामस्थानसंज्ञाकरणसमयेऽयं निष्कर्ष आगच्छति । अपि च जैनसिद्धान्तकौमुद्यां विद्यमानं सूत्रमिदं अविभक्ति नाम-विभक्तिरहितं शब्दस्वरूपं नामसंज्ञं स्यात्[12] इति सर्वापेक्षया सरलमित्यत्र नास्ति सन्देहस्यावकाशः । एतत् आधुनिकपरम्परायां प्रयोजनत्वं नितरां साध्नोतीति । धातुसंज्ञावेलायमयं निष्कर्ष आयाति । यत् पाणिनिसूत्रस्य सम्यग्व्याख्याकरणेनैव लाघवं भवितुमर्हति । किन्तु साधारणजनानां कृते जैनव्याकरणस्य अर्थम् अवगन्तुं तथा व्याख्यानस्य आवश्यकता नैव भविष्यति । अन्यत्र हरिनामामृतादिषु व्याकरणेषु धातुसंज्ञा तु अक्षरदृष्ट्या अत्यन्तं लाघवं वर्तते परन्तु अर्थावगमनाय जैनव्याकरणं सर्वोत्कृष्टमिति । अजन्तपुंलिङ्गप्रकरणे नत्वादेशसमयेऽयं निष्कर्षः समायाति । यत् उपरोक्तेषु पञ्चसु व्याकरणेषु चर्चाकरणेन राधान्तोऽयं निष्कर्ष्यते यत् श्रीमता रत्नचन्द्रस्वामिना प्रणीतमिदं सूत्रं सर्वोत्कृष्टायत एव । यतो हि पाणिनिनत्वविधिसूत्रे पूर्वस्मात्सूत्रादनुकरणमपेक्षितमस्ति । तत्र तस्मादिति कथनेन प्रथमयोः पूर्वसवर्णदीर्घः[13] इति सूत्रमिदमिङ्गितं करोति । किञ्च हरिनामामृतव्याकरणे सूत्रद्वयस्य अपेक्षास्ति । मुग्धबोधसारस्वतव्याकरणयोः तावल्लाघवं सद् व्याकरणेऽस्मिन् निर्दुष्टभूतमिदं सूत्रमिति । अजन्तप्रकरणे टाप्रत्यस्थाने नात्वादेशसमयेऽयं निष्कर्षो वदति । यत् उपरोक्तेषु पञ्चसु व्याकरणेषु चर्चाकरणेन इदमेव विशिष्यते यत् यद्यपि सर्वत्र एतेषु त्रिषु नत्वादिस्थलेषु सूत्राणामुपरि चर्चा कृताऽस्ति । तथापि भगवता

श्रीरत्नचन्द्रस्वामिना कृतानि सूत्राणि स्पष्टरूपेण नानुवृत्या नाध्याहारेण निसंदिग्धमर्थं प्रकाशयति इति नास्ति संदिग्धः। उदाहरणं यथा- नत्वादेशविषये हरिनामामृतव्याकरणे यद्यपि स्पष्टमेव अवभाषते तथापि गौरभूतमिदं सूत्रम्। किञ्च पाणिन्यादिव्याकरणेऽपि किञ्चित् किञ्चित् अध्याह्रियते न तथाऽस्मिन् जैनव्याकरणे इति कृत्वा सर्वोत्कृष्टमिदम् जैनव्याकरणमिति । ढत्वादेशव्याख्यानसमयेऽयं निष्कर्ष आगच्छति । यत् पाणिन्यादिव्याकरणापेक्षया रत्नचन्द्रेण प्रणीतमिदं सूत्रम् अक्षरदृष्ट्या हो ढौ झलि पदान्ते इति गौरवं ज्ञापयति । परन्तु कस्मादपि पदमननुवृत्तौ स्वकीयादेव अर्थावबोधने सूत्रमिदं कात्स्नमर्थं जनयति इति । पाणिनिसारस्वतव्याकरणे उभयाचर्ययोः सूत्रं समानमेव। तद्भिन्नमिदं सूत्रं ग्रन्थकारेण विरचितमिति कृत्वा ग्रन्थस्य नूतनत्वं प्रकाशयति। सार्वधातुकसंज्ञाव्याख्यानवेलायां पन्थाः अयं निष्कर्षति यत् भगवता रत्नचन्द्रेण प्रणीतं सूत्रमिदं सर्वापेक्षयोत्कृष्टमावहति । यतो हि पाणिनिसूत्रे तिङिति प्रत्याहारः ज्ञातव्यः तदनन्तरं तस्यार्थः अवगमनीयः परन्तु जैनव्याकरणसूत्रे आद्यपञ्च इति कथनेन लडादीनां बोधो भवति। एवम्प्रकारेण अक्षरदृष्ट्या दीर्घं सदपि अर्थबोधदृष्ट्या तु लाघवमेव प्रतिपादयति जैनसिद्धान्तीयं सूत्रमिदम् । किञ्च सारस्वतीयव्याकरणे कर्तरि पंच इत उक्त्वा आद्याः पञ्चलकाराः ग्रहणं भवन्ति । परन्तु शिद्विषयन्तु नैव प्रतिपादितम् । णिच्प्रत्ययव्याख्यानवेलायामयं निष्कर्षः समायाति यत् भगवता रत्नचन्द्रेण प्रवर्तनार्थे णिच्प्रत्ययो साक्षादेव भवतीति प्रोक्तम् । परन्तु पाणिनिमते हेतुमति च इत्यनेन सूत्रेण णिच्प्रत्ययो विहितोऽस्ति। अत्र तावत् हेतु इत्यस्यार्थं प्रतिपादयितुं तत्प्रयोजको हेतुश्चेति पृथक्सूत्रमिदमपेक्षमस्ति। अतः पाणिनिव्याकरणापेक्षया अस्य सूत्रस्य लाघवत्वं दृश्यत एव। तथैव अन्येष्वपि हरिनामामृतादिव्याकरणेषु णि प्रेरणादौ,त्रि प्रेरणे , धातोः प्रेरणे इत्यादीनि सूत्राणि अक्षरदृष्ट्या अर्थदृष्ट्या च लघुत्वञ्च भवत्येव । यङ्प्रत्ययस्य निष्कर्षः आगच्छति। यत् पाणिनिव्याकरणे यङ्प्रत्ययविधातुं सूत्रमेकं विरचितं किञ्च तेन साकं पृथक्तया वार्तिकमपि उपनिबद्धम्। अतः तस्य गौरवमावहति। परन्तु अक्षरदृष्ट्या यद्यपि सूत्रमिदं दीर्घायते तथापि सम्पूर्णं यङ्प्रत्ययस्य सारबोधं ज्ञापयत्येव । अन्येषु व्याकरणेषु सूत्राणामाकारः लघुरपि कात्स्नमर्थं बोध्यते । अत्र वास्तविकं जैनसिद्धान्तीयसूत्रमिदं गौरवायते । टाप्प्रत्ययव्याख्यानवेलायामयं निष्कर्षः समायाति यत् भगवता पाणिनिना कृते सूत्रे टाप् प्रत्ययो भवति अतः तस्य टकारस्य इत्संज्ञां विधातुं चुटू इत्यपि एकं सूत्रमावश्यकम्। पुनरपि स्त्रियामित्यस्मात् स्त्रियामिति अनुवर्तते। अतः अनुवर्तनस्य अनुबन्धस्य च अर्थदृष्ट्या अर्थावबोधवेलायां गौरवाय भवति।

## उपसंहारः

न केवलं पददृष्ट्या गौरवमर्थदृष्ट्यापि गौरवं स्वीक्रियते इति भगवता पतञ्जलिना अन्योन्याश्रयदोषखण्डनवेलायां प्रोक्तम्। तथैव अन्येष्वपि व्याकरणेषु पदानामनुवर्तनं व्याख्यानं वापेक्षितम्। सारस्वतव्याकरणेऽपि अजादेश्चाप् वक्तव्यः इति सूत्रं विरचितम् । परन्तु स्त्रीत्वस्याधिकारोऽपेक्षितः । परन्तु मुग्धबोधव्याकरणे तु एतदपेक्षया अधिकं वरमिति। किञ्च सर्वापेक्षया अतः स्त्रियामप् अर्थात् अदन्तात् नाम्नः स्त्रीत्वे द्योत्ये अप् प्रत्ययः स्यात्[14] इत्याकारार्थबोधकसूत्रं लाघवमेव । ईप्प्रत्ययव्याख्यानवेलायां निर्गच्छति अयं निष्कर्षः यत् अल्पमात्रा लाघवेन पुत्रोत्सवाः मन्यन्ते वैयाकरणाः इति भणितिरस्ति । तदर्थं भगवता पाणिनिना ङीप्प्रत्ययविधानार्थम् एकपदात्मकं सूत्रमिदं विरचितम्। परन्तु वास्तवेन जैनसिद्धान्तीयसूत्रमिदं न केवलमेककार्यं साधयति निःसन्दिग्धतया अपि तु सूत्रद्वयस्य त्रयस्य वा कार्यमेकेन सूत्रेण साध्यते। किञ्च पुनरपि अनुबन्धस्यापि अपेक्षा नैव प्रदर्शिता ग्रन्थकारेण । केवलम् ईप् इत्येव अननुबन्धयुक्तं पदं समुपस्थापितम् । वयसि प्रथमे[15] इति सूत्रव्याख्यानवेलायां निष्कर्षोऽयम् आगच्छति यत् श्रीमता सारस्वतकर्तृणा सारस्वतव्याकरणे प्रथमवयोवाचिनोऽत ईप् च वक्तव्यः इति सूत्रमिदं विरचितम्। वस्तुतः यद्यपि पददृष्ट्या सूत्रमिदं गौरवस्पदं परन्तु अर्थदृष्ट्या तु सर्वोत्तमं लाघवमेव। भगवता पाणिनिना वयसि प्रथमे इत्यस्मिन् सूत्रे प्रथमवयोवाचिनः इति पदं सूत्रे उटङ्क्य सूत्रार्थं प्रकटयति । परन्तु जैनसिद्धान्तकौमुदीकर्त्रा तु स्पष्टार्थयुक्तपदं समुपस्थापितम् । तेन प्रथमवयसि इत्यर्थं सङ्कल्य पूर्वस्मात् सूत्रात् ईबिति पदमनुवृत्य यथेष्टं साधयति । अतः पक्षान्तरेऽपि सूत्रमिदं लाघवायते । वतो गुणवचनात् सूत्रव्याख्यानवेलायामुच्यते अयं निष्कर्षो यत् वस्तुतः कानिचित् गुणवाचकानि पदानि सन्ति तेभ्यः शब्देभ्यः ईप् प्रत्ययो न भवति इति आशुबोधादिषु व्याकरणेषु प्रदर्शितम्। उदाहरणं यथा- पाण्डुशब्दः अस्मात् शब्दात्

ईप्प्रत्ययो नैव भूयते , परन्तु पाणिनिव्याकरणानुसारेण अयं गुणवाचि-उकारान्तत्वात् अवश्यमेव प्रत्ययविधानं स्यात् । किन्तु कार्यमिदं साधितम् आशुबोधग्रन्थकर्तृणा तेन सूत्रेऽस्मिन् असंयोगपधात् इति पदं प्रयुक्तम् । तेन संयोगोपधेभ्यः पाण्डु – इत्यादिशब्देभ्यः ईप्प्रत्ययो नैव भवितुमर्हति । परन्तु जैनसिद्धान्तकौमुद्यां गुणवाचकादुकारान्ताद् ई इति कथनेन एतदेव अस्य व्याकरणस्य लघुत्वस्य प्रदर्शनमिति । पाणिनिव्याकरणस्य सूत्राणि यत्र सुलभानि भवन्ति तत्र ग्रन्थकर्तृणा तान्येव पदानि प्रयुञ्जीरन् । उदाहरणं यथा- क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः[16], धारेरुत्तमर्णः[17] इत्यादीनि सन्ति । किञ्च यत्र पाणिनीयसूत्रे काठिन्यं पदं भवति तत्र जैनसिद्धान्तकर्तृभिः सुकरं पदं स्थापितम् । प्रायतः विधिसूत्राणि पाणिनिसूत्रैः तुल्यं जैनसिद्धान्तीयं भवति । उदाहरणं यथा- संप्रदाने चतुर्थी[18] , अपादाने पञ्चमी[19],अधिकरणे सप्तमी[20] इत्यादीनि समानानि जैनसिद्धान्तकौमुद्यां विरचितानि सन्त्येव । एवं प्रकारेण अस्य शोधप्रबन्धस्य अध्ययनेन जैनसिद्धान्तकौमुद्याः अत्यन्तं लाघवं पदानाञ्च मनोहरप्रयोगः विदुषः प्रसीदति इति ।

## पादटिप्पणी-

1.जै.सि.कौ.1.1.8

2.जै.सि.कौ.1.1.17

3.जै.सि.कौ.1.2.22

4.जै.सि.कौ.1.1.42

5.जै.सि.कौ.1.1.50

6.पा.अ.सू.सं.2.3.5

7.पा.अ.सू.सं.2.3.6

8.जै.सि.कौ.1.2.24

9.जै.सि.कौ.1.1.45

10.जै.सि.कौ.1.1.6

11.पा.अ.सू.सं.1.1.9

12.जै.सि.कौ.1.1.24

13.पा.अ.सू.सं.6.1.102

14.जै.सि.कौ.1.2.2

15.पा.अ.सू.सं.4.1.20

16.पा.अ.सू.सं.1.4.37

17. पा.अ.सू.सं.1.4.35

18. पा.अ.सू.सं.2.3.13

19. पा.अ.सू.सं.2.3.65

20.जै.सि.कौ.1.1.8